कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



१५३ श्रीगणेशाय नमः॥ श्रीहरिं परमानंदमुपदेष्टारमीश्वरं॥ व्या
पकं सर्वलोकानां कारणं तन्नमाम्यहं॥१॥ अपरोक्षानुभूति
र्वै प्रोच्यते मोक्षसिद्धये॥ सद्भिरेवं प्रयत्नेन वीक्षणीया मुहुर्मुहुः॥२॥
स्ववर्णाश्रमधर्मेण तपसा हरितोषणात्॥ साधनं प्रभवेत्पुंसां वैरा
ग्यादिचतुष्टयं॥३॥ ब्रह्मादिस्थावरांतेषु वैराग्यं विषयेष्वनु
यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलं॥४॥ नित्यमात्मस्वरूपं
हि दृश्यं तद्विपरीतगं॥ एवं यो निश्चयः सम्यक् विवेको वस्तुनः
स वै॥५॥ सदैव वासनात्यागः शमोऽयमिति शब्दितः॥ निग्रहो
बाह्यवृत्तीनां दम इत्यभिधीयते॥६॥ विषयेभ्यः परावृत्तिः परमो
परतिर्हि सा॥ सहनं सर्वदुःखानां तितिक्षा सा शुभा मता॥७॥ निग
माचार्यवाक्येषु भक्तिः श्रद्धेति विश्रुता। चित्तैकाग्र्यं तु सल्लक्ष्ये स
माधानमिति स्मृतं॥८॥ संसारबंधनिर्मुक्तिः कथं स्यान्मे कदा
विभो। इति या सुदृढा ब [illegible] व्या सा मुमुक्षुता॥९॥ उक्तसाध

Acc. No:- ~~1225~~ M1008

Title :- अपरोक्षानुभव

Author :- शंकराचार्य

Subject :- वैदिक

पत्रे - १२

Checked 2012

K K S U LIBRARY
RAMTEK
441 106
M/008
Dist Nagpur

7

युक्तेन।विचारःपुरुषेणाहि।कर्तव्योज्ञानसिध्यर्थमात्मनःशुभ
मिच्छता॥१०॥नोत्पद्यतेविनाज्ञानंविचारेणान्यसाधनैः॥यथापदार्थ
ज्ञानंहिप्रकाशेननविनाक्वचित्॥११॥कोहंकथमिदंजातंकोवैकर्तास्य
विद्यते॥उपादानंकिमस्तीहविचारःसोयमीदृशः॥१२॥नाहंभूतगणो
देहोनाहंचाक्षुगणस्तथा॥एतद्विलक्षणःकश्चिद्विचारःसोयमीदृशः॥१३॥
अज्ञानप्रभवसर्वंज्ञानेनप्रविलीयते।संकल्पविविधःकर्ताविचा०॥१४॥
एतयोर्यदुपादानमेकंसूक्ष्मंसदव्ययं॥यथैवमृद्घटादीनांवि०॥१५॥
अहमेकोपिसूक्ष्मश्चज्ञातासाक्षीसदव्ययः॥तदहंनात्रसंदे
होवि०॥१६॥आत्माविनिष्कलोह्येकोदेहोबहुभिरावृतः॥तयोरैक्यं
प्रपश्यंतिकिमज्ञानमतःपरं॥१७॥आत्माचैतन्यरूपस्तुदेहोजड
मयोह्यसौ॥तयो०॥१८॥आत्मानियामकश्चांतर्देहोनियमबाध्यकः॥तयो०॥१९॥
आत्माज्ञानमयःपुण्योदेहोमांसमयोऽशुचिः॥तयो०॥२०॥आत्माप्रकाश
कस्वच्छोदेहस्तामसउच्यते॥तयो०॥२१॥आत्मानित्योहिसद्रूपोदेहोनि
त्योह्यसन्मयः॥तयो०॥२२॥आत्मनःस्वप्रकाशत्वंयत्पदार्थावभासनं॥
नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यांध्यंयतोनिशि॥२३॥देहोहमित्ययं

2

मूढो धत्वातिषच्य होऽज्ञनः।ममायमित्यपिज्ञात्वा घटद्र[illegible] सर्वदा।२४।
ब्रह्मैवाहं समः शांतः सच्चिदानंदलक्षणः।नाहं देहो ह्यसद्रूपो ज्ञानमित्यु
च्यते बुधैः।२५।निर्विकारो निराकारो निरवद्योहमव्ययः।नाहं देहो०।२६।
निरामयो निराभासो निर्विकल्पोहमास्थितः।नाहं०।२७।निर्गुणो निःक्रियो
नित्यो नित्यमुक्तोहमच्युतः।नाहं०।२८।निर्मलो निश्चलोनंतः शुद्धोहमज
रोमरः।नाहं०।२९।स्वदेहे शोभनं त्यक्त्वा पुरुषाख्यं च संमतं।किं मूर्ख शून्य
मात्मानं देहातीतं करोषि भो।३०।स्वात्मानं शृणु मूर्ख त्वं युक्त्या श्रुत्या च पूरु
षं।देहातीतं सदाकारं सुदुर्दर्शं भवादृशैः।३१।अहंशब्देन विख्यात एक ए
वस्थितः परः।स्थूलस्त्वनेकसंप्राप्तः कथं स्याद्देहकः पुमान्।३२।अहं द्र
ष्टतया सिद्धो देहो दृश्यतया स्थितः।ममायमिति निर्देशात्कथं स्याद्देह
कः पुमान्।३३।अहं विकारहीनस्तु देहो नित्यं विकारवान्।इति प्रतीयते
साक्षात्कथं०।३४।यस्मात्परमिति श्रुत्या तया पुरुषलक्षणं।विनिर्णीतं विमू
ढेन कथं०।३५।सर्वं पुरुष एवेति सूक्ते पुरुषसंज्ञिते।अप्युच्यते यतः श्रुत्या
कथं स्यात्०।३६।असंगः पुरुषः प्रोक्तो बृहदारण्यकेपि च।अप्यनंतम
लसंश्लिष्टं कथं०।३७।तत्रैव च समाख्यातः स्वयंज्योतिर्हि पूरुषः।जडः पर

धकार्योयंकथं०रूपश्चोक्तोपिकर्मकांडेनह्यात्मादेहादिलक्षणः।नि
त्यश्चायंफलंभुंक्तेदेहपातादनंतरं।३९।लिंगंचानेकसंयुक्तंचलंदृश्यं
विकारिच।अव्यापकमसद्रूपंतत्कथंस्यासुमानयं॥४०॥एवंदेहद्वयाद
न्यआत्मापुरुषईश्वरः।सर्वात्मासर्वरूपश्चसर्वातीतोहमव्ययः।४१।इत्या
त्मदेहभागेनप्रपंचस्यैवनित्यता।यथोक्तातर्कशास्त्रेणकिंततःपुरुषार्थ
ता।४२।इत्यात्मदेहभेदेनदेहात्मत्वंनिवारितं।इदानींदेहभेदस्यह्यसत्वं
स्फुटमुच्यते।४३।चैतन्यस्यैकरूपत्वाद्भेदोयुक्तोनकर्हिचित्।जीवत्वंचमृ
षाज्ञेयंरज्ज्वांसर्पग्रहोयथा।४४।रज्ज्वज्ञानात्क्षणेनैवयद्वद्रज्जुर्हिसर्पिणी।
भातितद्वच्चितिःसाक्षाद्विश्वाकारेणकेवला।४५।उपादानंप्रपंचस्यब्रह्मणो
न्यन्नविद्यते।तस्मात्सर्वप्रपंचोयंब्रह्मैवास्तिनचेतरत्।४६।व्याप्यव्यापकता
मिथ्यासर्वमात्मेतिशासनात्।इतिज्ञातेपरेतत्त्वेभेदस्यावसरःकुतः।४७।
श्रुत्यानिवारितंनूनंनानात्वंस्वमुखेनहि।कथंभासोभवेदन्यःस्थितेचा
द्वयकारणे॥४८॥दोषोपिविहितःश्रुत्यामृत्योर्मृत्युंसगच्छति।इहपश्य
तिनानात्वंमाययावंचितोनरः।४९।ब्रह्मणःसर्वभूतानिजायंतेपरमात्म
नः।तस्माद्देतानिब्रह्मैवभवंतीत्यवधारयेत्॥५०॥ब्रह्मैवसर्वनामानिरू०

पाणि विविधानि च । कर्माण्यपि समग्राणि बिभर्तीति श्रुतिर्जगौ ॥५१॥ सुवर्णा
ज्जायमानस्य सुवर्णत्वं च शाश्वतं । ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवे
त् ॥५२॥ स्वल्पमप्यंतरं कृत्वा जीवात्मपरमात्मनोः । यः संतिष्ठति मूढात्मा भयं तस्या
भिभाषितं ॥५३॥ यत्राज्ञानाद्भवेद्द्वैतमितरस्तत्र पश्यति । आत्मत्वेन यदा सर्वं ने
तरस्तत्र चाण्वपि ॥५४॥ यस्मिन् सर्वाणि भूतानि ह्यात्मत्वेन विजानतः । न वै तस्य भ
वेन्मोहो न च शोकोऽद्वितीयतः ॥५५॥ अयमात्मा हि ब्रह्मैव सर्वात्मकतया स्थितः ॥
इति निर्धारितं श्रुत्या बृहदारण्यकसंस्थया ॥५६॥ अनुभूतोऽप्ययं लोको व्यवहा
रक्षमोऽपि सन् ॥ असद्रूपो यथा स्वप्न उत्तरक्षणबाधतः ॥५७॥ स्वप्नो जागरणे
ऽलीकः स्वप्नेऽपि जागरो न हि ॥ द्वयमेव लये नास्ति लयोऽपि ह्युभयोर्न च ॥५८॥
त्रयमेवं भवेन्मिथ्या गुणत्रयविनिर्मितं ॥ अस्य द्रष्टा गुणातीतो नित्यो ह्ये
कश्चिदात्मकः ॥५९॥ यद्वन्मृदि घटभ्रांतिः शुक्तौ वा रजतस्थितिः ॥ तद्वद्ब्रह्म
णि जीवत्वं वीक्ष्यमाणे तु नश्यति ॥६०॥ यथा मृदि घटो नाम कनके कुंडलाभि
धा ॥ शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथा परे ॥६१॥ यथैव व्योम्नि नीलत्वं य
था नीरं मरुस्थले ॥ पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ॥६२॥ यथैव शून्ये
[illegible]र्वाणां पुरं यथा ॥ यथाकाशे द्विचंद्रत्वं तद्वत्सत्ये जगत्स्थितिः ॥६३॥
[illegible]तदभावत[illegible]र्जलमेव स्फुरत्यलं ॥ पात्ररूपेण ताम्रं हि ब्रह्मांडौघैस्तथात्म
[illegible] यथा पृथ्व[illegible]तंतवः ॥ जगन्नाम्ना चिदाभाति ज्ञेयं

पासवापच्यवतार ब्रह्मणा क्रियते जनैः ॥ अज्ञानान्नृविज्ञा
नाति मृदेव हि घटादिकः ॥ ६६ ॥ कार्यकारणता नित्यं आस्ते घटमृदोर्यथा ॥ त
थैव श्रुतियुक्तिभ्यां प्रपंचब्रह्मणोरिह ॥ ६७ ॥ गृह्यमाणे घटे यद्वन्मृत्तिकायाति वै
बलात् ॥ वीक्ष्यमाणे प्रपंचेपि ब्रह्मैवाभाति भास्वतं ॥ ६८ ॥ सदैवात्मा विशुद्धोस्ति
ह्यशुद्धो भाति वै सदा ॥ यथैव द्विविधा रज्जुर्ज्ञानिनोऽज्ञानिनो नित्यं ॥ ६९ ॥ कुंभो
यथैव मृन्मयस्तद्वद्देहोपि चिन्मयः ॥ आत्मानात्मविभागोयं मुधैव क्रियते जनैः ॥ ७० ॥
सर्पत्वेन यथा रज्जुरजतत्वेन शुक्तिका ॥ विनिर्णीता विमूढेन देहत्वेन तथात्मता ॥ ७१ ॥
घटत्वेन यथा पृथ्वी पटत्वेनैव तंतवः ॥ विनिर्णीता विमूढेन देहत्वेन तथात्मता ॥ ७२ ॥
कनकं कुंडलत्वेन तरंगत्वेन वै जलं ॥ विनि॰ ॥ ७३ ॥ पुरुषत्वेन वै स्थाणुर्ज
लत्वेन मरीचिका ॥ विनिर्णी॰ ॥ ७४ ॥ गृहत्वेनापि काष्ठानि खड्गत्वेनैव लोहता ॥ वि॰ ॥ ७५
यथा वृक्षविपर्यासो जलाद्भवति कस्यचित् ॥ तद्वदात्मनि देहत्वं पश्यत्यज्ञानयो
गतः ॥ ७६ ॥ पोतेन गच्छतः पुंसः सर्वं भातीव चंचलं ॥ तद्व ॥ ७७ ॥ पीतत्वं हि यथा शुभ्रे
दोषाद्भवति कस्यचित् ॥ तद्व ॥ ७८ ॥ चक्षुर्भ्यां भ्रमशीलाभ्यां सर्वं भाति भ्रमात्म
कं ॥ तद्व ॥ ७९ ॥ अलातं भ्रमणेनैव वर्तुलं भाति सूर्यवत् ॥ तद्व ॥ ८० ॥ महत्वे सर्ववि
स्तूनामणुत्वं ह्यतिदूरतः ॥ तद्व ॥ ८१ ॥ सूक्ष्मत्वं सर्वभावानां स्थूलत्वं चोपनेत्रतः ॥
तद्व ॥ ८२ ॥ काचभूमौ जलत्वं वा जलभूमौ हि काचता ॥ तद्व ॥ ८३ ॥ यद्वदग्नौ मणि
त्वं हि मणौ वा वह्निता पुमान् ॥ तद्व ॥ ८४ ॥ यथैवादिविपर्यासो मोहाद्भवति कस्यचि

त्॥ तद्व॥८५॥ अभ्रेषु सत्सु धावत्सु सोमो धावति भाति वै ॥ तद्व॥८६॥ एव मा
त्मन्यविज्ञाते देहाध्यासो हि जायते ॥ स एवा[illegible]परिज्ञानात् लीयते च परात्म
नि ॥८७॥ यथाखाद्रीड्ल लेभाति चं चलत्वेन कस्यचित् ॥ तद्व॥८८॥ सर्वमात्मतया
ज्ञातं जगत्स्थावरजंगमं ॥ अभावात्सर्वभावानां देहतां चात्मता कुतः ॥८९॥
आत्मानं सततं ज्ञात्वा कालं नय महा[illegible]ते ॥ प्रारब्धमखिलं भुंजन्नोद्वेगं कर्तु
मर्हसि ॥९०॥ उत्पन्ने[illegible]यात्मविज्ञाने प्रारब्धं नैव मुंचति ॥ इति यच्छ्रूयते शास्त्रे
स्व तन्निराक्रियतेधुना ॥९१॥ तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते ॥ देहादीनाम
सत्वात्तु यथा स्वप्नो विबोधतः ॥९२॥ कर्म जन्मांतरीयं यत् प्रारब्धमिति कीर्तितं ॥
तत्तु जन्मांतराभावात् पुंसो नैवास्ति कर्हिचित् ॥९३॥ स्वप्नदेहो यथाध्यस्तस्तथै
यं वाहं हि देहकः ॥ अध्यस्तस्य कुतो जन्म जन्माभावे स्थितिः कुतः ॥९४॥ उपादानं प्र
पंचस्य मृद्भांडस्येव पश्यति ॥ अज्ञानं चेति वेदांतैस्त[illegible]स्मिन्नष्टे क्व विश्वता ॥९५॥ य
था रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात् ॥ तद्वत्सत्यमविज्ञाय जगत्पश्यति मू
ढधीः ॥९६॥ रज्जुरूपे परिज्ञाते सर्पखंडं न तिष्ठति ॥ अधिष्ठाने तथा ज्ञाते प्रपंचे शू
न्यतां गते ॥९७॥ देहस्यापि प्रपंचत्वात् प्रारब्धावस्थितिः कुतः ॥ अज्ञानजनबोधा
र्थं प्रारब्धं वक्ति वै श्रुतिः ॥९८॥ क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ बहु
त्वं तन्निषेधार्थं श्रुत्या गीतं च वै स्फुटं ॥९९॥ उच्यतेऽज्ञैर्बलाच्चैतत् तदानर्थद्वया
गमः ॥ वेदांतमतहानि[illegible]यतो मतिश्रुतिः ॥१००॥ त्रिपंचांगान्यथो वक्ष्ये

7

पूर्वोक्तस्य हि लब्धये ॥ तैश्च सर्वैः सद[illegible]ायं निदिध्यासनमेव तु ॥ ११ ॥ नित्या
भ्यासादृते प्राप्तिर्न भवेत्सच्चिदात्मनः ॥ तस्माद्ब्रह्म निदिध्यासेज्जिज्ञासुः श्रेय
से चिरं ॥ २ ॥ यमो हि नियमस्त्यागो मौनं देशश्च कालतः ॥ आसनं मूलबंधश्च दे
हसाम्यं च दृक्स्थितिः ॥ ३ ॥ प्राणसंयमनं चैव प्रत्याहारश्च धारणा ॥ आत्मध्या
नसमाधिश्च प्रोक्तान्यंगानि वै क्रमात् ॥ ४ ॥ सर्वं ब्रह्मेति विज्ञानादिंद्रियग्राम
संयमः ॥ यमोयमिति संप्रोक्तोभ्यसनीयो मुहुर्मुहुः ॥ ५ ॥ सजातीयप्रवाहश्च
विजातीयतिरस्कृतिः ॥ नियमो हि परानंदो नियमः क्रियते बुधैः ॥ ६ ॥ त्यागः प्र
पंचरूपस्य चिदात्मत्वावलोकनात् ॥ त्यागो हि महतां पूज्यः सद्यो मोक्षमयो
यतः ॥ ७ ॥ यस्माद्वाचो निवर्तंते अप्राप्य मनसा सह ॥ यन्मौनं योगिभिर्ग
म्यं तद्भवेत्सर्वदा बुधः ॥ ८ ॥ वाचो यस्मान्निवर्तंते तद्वक्तुं केन शक्यते ॥ प्रपंचो
यदि वक्तव्यः सोपि शब्दविवर्जितः ॥ ९ ॥ इति वा तद्भवेन्मौनं सतां सहजसंज्ञि
तं ॥ गिरां मौनं तु बालानां प्रयुक्तं ब्रह्मवादिभिः ॥ १० ॥ आदावंते च मध्ये च जनो य
स्मिन्न विद्यते ॥ येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥ ११ ॥ कलनात्सर्वभूता
नां ब्रह्मादीनां निमेषतः ॥ कालशब्देन निर्दिष्टो ह्यखंडानंद अद्वयः ॥ १२ ॥ सुखे
नैव भवेद्यस्मिन्नजस्रं ब्रह्मचिंतनं ॥ आसनं तद्विजानीयान्नेतरत्सुखना
शकं ॥ १३ ॥ सिद्धं यत्सर्वभूतादि विश्वाधिष्ठानमव्ययं ॥ यस्मिन्सिद्धाः समावि
ष्टास्तद्वै सिद्धासनं भवेत् ॥ १४ ॥ यन्मूलं सर्वलोका

मूलबंधः सदासेव्यो योग्योसौ राजयोगिनां ॥१५॥ अंगानां समतां विंद्यात्समे
ब्रह्मणि लीयते ॥ नो चेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत् ॥१६॥ दृष्टिं ज्ञानमयीं
कृत्वा पश्येद्ब्रह्ममयं जगत् ॥ सा दृष्टिः परमोदारा न नासाग्रावलोकिनि ॥१७॥ द्र
ष्टृदर्शनदृश्यानां विरामो यत्र वा भवेत् ॥ दृष्टिस्तत्रैव कर्तव्या न नासाग्रावि
लोकिनी ॥१८॥ चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात् ॥ निरोधः सर्ववृत्ती
नां प्राणायामः स उच्यते ॥१९॥ निषेधनं प्रपंचस्य रेचकाख्यः समीरणः ॥ ब्रह्मै
वास्मीति या वृत्तिः पूरको वायुरीरितः ॥२०॥ ततः सद्वृत्तिनैश्चल्यं कुंभकः प्रा
णसंयमः ॥ अयं चापि प्रबुद्धानां अज्ञानां घ्राणपीडनं ॥२१॥ विषयेष्वात्म
तां दृष्ट्वा मनसश्चित्तिमज्जनं ॥ प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः ॥२२॥
यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् ॥ मनसो धारणं चैव धारणा सा
परा मता ॥२३॥ ब्रह्मैवास्मीति सद्वृत्त्या निरालंबतया स्थितिः ॥ ध्यानशब्दे
न विख्याता परमानंददायिनी ॥२४॥ निर्विकारतया वृत्त्या ब्रह्माकारतया
पुनः ॥ वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसंज्ञकः ॥२५॥ इमं चाकृत्रिमा
नंदं तावत्साधुः समभ्यसेत् ॥ वश्यो यावत्क्षणात्पुंसः प्रयुक्तः सन्भवेत्स्व
यं ॥२६॥ ततः साधननिर्मुक्तः सिद्धो भवति योगिराट् ॥ तत्स्वरूपं नौ [illegible] तस्या
नः

यो मनसो [illegible]२७॥ समाधौक्रियमाणेतुविघ्नान्यायांतिवैबलात्॥ अनु
संधानराहित्यमालस्यंभोगलालसं॥२८॥ यंतमश्चविक्षेपरसोजस्वा
दश्चशून्यता॥ एवंयद्विघ्नबाहुल्यंत्याज्यंब्रह्मविदाशनैः॥२९॥ भाववृत्त्या
हिभावत्वंशून्यवृत्त्याहिशून्यता॥ ब्रह्मवृत्त्याहिपूर्णत्वंतथापूर्णत्वमभ्यसे
त्॥३०॥ येहिवृत्तिंविहायैनांब्रह्माख्यांपावनींपरां॥ तेतुवृथैवजीवंतिप
शुभिश्चसमानराः॥३१॥ येतुवृत्तिंविजानंतिज्ञात्वापिवर्धयंतिये॥ तेवैस
त्पुरुषाधन्यावंद्यास्तेभुवनत्रये॥३२॥ येषांवृत्तिःसमावृद्धापरिपक्वाचसा
पुनः॥ तेवैसद्ब्रह्मतांप्राप्तानेतरेशब्दवादिनः॥३३॥ कुशलाब्रह्मवार्तायांवृ
त्तिहीनाःसुरागिणः॥ तेप्यज्ञानतमान्नूनंपुनरायांतियांतिच॥३४॥ निमेषार्धं
नतिष्ठंतिवृत्तिंब्रह्ममयींविना॥ यथातिष्ठंतिब्रह्माद्याःसनकाद्याःशुकादयः॥३५॥
कार्यकारणतायाताकारणेनहिकार्यता॥ कारणत्वंततोनश्येत्कार्याभावेविचा
रतः॥३६॥ अथशुद्धंभवेद्वस्तुयद्वैवाचामगोचरं॥ द्रष्टव्यंमृद्घटेनैवदृष्टांते
नपुनःपुनः॥३७॥ अनेनैवप्रकारेणवृत्तिर्ब्रह्मात्मिकाभवेत्॥ उदेतिशुद्ध
चित्तानांवृत्तिज्ञानंततःपरं॥३८॥ कारणंव्यतिरेकेणपुमानादौविलोकये
त्॥ अन्वयेनपुनस्तद्धिकार्येनि त्यंप्रपश्यति॥३९॥ कार्येहिकारणंपश्ये

भागरेकण

स्पश्चात्कार्यं विचर्जमेत्॥ कारणत्वं स्वतो गच्छेद वश्रिष्टं भवेन्मुनिः॥४०॥१भावितं
तीव्रवेगेन यद्वस्तु निश्चयात्मना॥ पुमानूतद्धि भवेच्छीघ्रं ज्ञेयं भ्रमरकीटवत्॥४१॥
अदृश्यभावरूपं च सर्वमेतच्चिदात्मकं॥ सावधानतया नित्यं स्वात्मानं चैव भा
वयेत्॥४२॥ दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिंतयेत्॥ विद्वान्नित्यं सुखे ति
ष्ठेद्धिया चिद्रसपूर्णया॥४३॥ एभिरंगैः समायुक्तो राजयोगमुदाहृतः॥ किंचि
त्पक्वकषायानां हठयोगेन संयुतः॥४४॥ परिपक्वं मनो येषां केवलोयं च सि
द्धिदः॥ गुरुदेवतभक्तानां सर्वेषां सुलभो जवात्॥१४५॥ ॥इति श्रीमच्छंकरा
चार्यविरचितं अपरोक्षानुभवाख्यं प्रकरणं समाप्तिमगमत्॥ ॥



अपरोक्षानुभव पु०८८

K K S U LIBRARY
RAMTEK
441 106
M1008
Dist Nagpur

```
[OrderDescription]
,CREATED=06.10.20 11:08
,TRANSFERRED=2020/10/06 at 11:10:04
,PAGES=12
,TYPE=STD
,NAME=S0003899
,Book Name=M-1008-APROSNUBHAV
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,
```